लोम्येन जायन्ते शूद्रादपसदास्त्रयः ।. वैश्यान्मागधवैदेहौ क्षत्त्रियात्सूत एव तु । प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः । जातो निषादाच्छूद्रायां जात्या भवति पुक्कशः । शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः । क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते । वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते । द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् । तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनिर्द्दिशेत् । व्रात्यात्तु जायते विप्रात् पापात्मा भूर्ज्जकण्टकः । आवन्त्यवाटधानौ च पुष्पधः शैख एव च । झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च । नटश्च करणश्चैव खसो द्रविड एव च । वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च । कारूषश्च विजन्मा च मैत्रः सात्वत एव च । व्यभिचारेण वर्णानामवेद्यावेदनेन च । स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः । सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः । अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः । सूतो वैदेहकश्चैव चण्डालश्च नराधमः । मागधः क्षत्तृजातिश्च तथाऽयोगव एव च । एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु । मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु । यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते । आनन्तर्य्यात् स्वयोन्यान्तु तथा बाह्येष्वपि क्रमात् । ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषितान् । परस्परस्य दारेषु जनयन्ति विगर्हितान् । यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते । तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते । प्रतिकूलं वर्त्तमाना बाह्या बाह्यतरान् पुनः । हीना हीनात् प्रसूयन्ते वर्णान् पञ्चदशैव तु । प्रसाधनोपचारज्ञमदासं दासजीवनम् । सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे । मैत्रेयकन्तु वैदेहो माधुकं सम्प्रसूयते । नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये । निषादो भार्गवं सूते दाशं नौकर्म्मजीविनम् । कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः । मृतवस्त्रभृत्नारीषु गर्हितान्नाशनासु च । भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः । कारावरो निषादात्तु चर्म्मकारः प्रसूयते । वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ । चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् । आहिण्डिको निषादेन वैदेह्यामेव जायते । चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् । पुक्कस्यां जायते पापः सदा सज्जनगर्हितः । निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम् । श्मशानगोचरं सूते बाह्यानामपि गर्हितम् । सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः । प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः । सजातिजानन्तरजाः षट् सुता द्विजधर्म्मिणः । शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः । तपोवीजप्रभावैस्तु ते गच्छन्ति युगे युगे । उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः । शनकैस्तु क्रियालोपादिमाः क्षत्त्रियजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः । पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः । मुखबाहूरुपज्जानां या लोके जातयो बहिः । म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः । ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः । ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्म्मभिः । सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम् । वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः । मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च । मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् । क्षत्त्रुग्रपुक्कसानान्तु बिलौकोवधबन्धनम् । धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवादनम् । चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च । वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्म्मभिः । चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः । अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्द्दभम् । वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् । कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः । न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन् । व्यवहारो मिथस्तेषां विवाहः सदृशैः सह । अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने । रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च । दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः । अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः । बध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया । बध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च । वर्णापेतमविज्ञातं नरं कलुषयोनिजम् । आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत् । अनार्य्यता निष्ठुरता क्रूरता निष्क्रियात्मता । पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् । पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा । न कथञ्चन दुर्य्योनिः प्रकृतिं स्वां नियच्छति । कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसङ्करः । संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु । यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः । राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति । ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।